# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

उपविषयः- हल्सन्धिप्रकरणम्

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

पदसाधनम्

(लघुसिद्धान्तकौमुदी)

हल्सन्धिप्रकरणम्

# रामश्शेते

रामस् शेते     इति स्थिते

रामस् + शेते   'स्तोः श्चुना श्चुः' तथा 'यथासंख्यमनुदेशः' समानाम् इति सूत्रसहकारेण सकारस्थाने शकारादेशे

रामश्शेते     पदसिद्धम् ।

# रामश्चिनोति

| | |
|---|---|
| रामस् + चिनोति | इति स्थिते |
| रामश् + चिनोति | "स्तोः श्चुना श्चुः" इति सूत्रेण सकारस्य श्चुत्वेन शकारादेशे |
| रामश्चिनोति | पदसिद्धम्। |

# रामष्टीकते

| | |
|---|---|
| रामस् + टीकते | इति स्थिते |
| रामष् + टीकते | 'ष्टुना ष्टुः' इति सूत्रेण सकारस्य ष्टुत्वेन षकारादेशे |
| रामष्टीकते | पदसिद्धम् । |

# सच्चित्

सत् + चित्   इति स्थिते
सद् + चित्   श्चुत्वस्यासिद्धत्वात् 'झलां जशोऽन्ते' इति सूत्रेण जश्त्वे
सज् + चित्   'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वेन जकारादेशे
सच् + चित्   'खरि च' इति सूत्रेण जकारस्य चर्त्वम्
सच्चित्   पदसिद्धम्।

# प्रश्नः

| | |
|---|---|
| प्रश् + नः | इति स्थिते |
| प्रश्नः | 'स्तोः श्चुना श्चुः' इति सूत्रेण नकारस्य श्चुत्वे प्राप्ते 'शात्' इति सूत्रेण श्चुत्वनिषेधे कृते |
| प्रश्नः | पदसिद्धम् । |

# रामष्षष्ठः

रामस् + षष्ठः इति स्थिते

रामष् + षष्ठः ‘ष्टुना ष्टुः’ इति सूत्रेण सकारस्य ष्टुत्वेन षकारादेशे

रामष्षष्ठः पदसिद्धम् ।

# रामष्टीकते

| | |
|---|---|
| रामस् + टीकते | इति स्थिते |
| रामष् + टीकते | 'ष्टुना ष्टुः' इति सूत्रेण सकारस्य ष्टुत्वेन षकारादेशे |
| रामष्टीकते | पदसिद्धम्। |

# पेष्टा

| | |
|---|---|
| पेष् + ता | इति स्थिते |
| पेष् + टा | ‘ष्टुना ष्टुः’ इति सूत्रेण तकारस्य ष्टुत्वेन टकारादेशे |
| पेष्टा | पदसिद्धम् । |

# तट्टीका

| | |
|---|---|
| तद् + टीका | इति स्थिते |
| तड् + टीका | ‘ष्टुना ष्टुः’ इति सूत्रेण दकारस्य ष्टुत्वेन डकारादेशे |
| तट् + टीका | ‘खरि च’ इति सूत्रेण चर्त्वे कृते |
| तट्टीका | पदसिद्धम् । |

# षण्णाम्

| | |
|---|---|
| षड् + नाम् | 'ष्टुना ष्टुः' इति सूत्रेण डकारयोगे नाम् इत्यस्य नकारस्य स्थाने णकारादेशे |
| षड् + णाम् | 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन अनुनासिके प्राप्ते |
| षण्णाम् | पदसिद्धम् । |

# वागीशः

वाक् +ईशः इति स्थिते

वाग् + ईशः ‘झलां जशोऽन्ते’ इति सूत्रेण ककारस्य जश्त्वेन गकारादेशे

वागीशः पदसिद्धम् ।

# एतन्मुरारिः

| | |
|---|---|
| एतद् + मुरारिः | इति स्थिते |
| एतन् + मुरारिः | 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण दकारस्यानुनासिकम् |
| एतन्मुरारिः | पदसिद्धम्। |
| एतद्मुरारिः | (अनुनासिकाभावे) |

# तन्मात्रम्

| | |
|---|---|
| तद् + मात्रम् | इति स्थिते |
| तन् + मात्रम् | ‘यरोऽनुनासिकेऽनुनासिको वा’ इति सूत्रेण विकल्पे प्राप्त अनुनासिकस्य निषेधे कृते ‘प्रत्यये भाषायां नित्यम्’ इति वार्तिकेन दकारस्यानुनासिकम् |
| तन्मात्रम् | पदसिद्धम्। |

# चिन्मयम्

| | |
|---|---|
| चिद् + मयम् | इति स्थिते |
| चिन् + मयम् | ‘यरोऽनुनासिकेऽनुनासिको वा’ इति सूत्रेण विकल्पे प्राप्त अनुनासिकस्य निषेधे कृते ‘प्रत्यये भाषायां नित्यम्’ इति वार्तिकेन दकारस्यानुनासिकम् |
| चिन्मयम् | पदसिद्धम् । |

# तल्लयः

तद् + लयः इति स्थिते

तल् + लयः ‘तोर्लिः’ इति सूत्रेण दकारस्य परसवर्णे

तल्लयः पदसिद्धम् ।

# तच्छिवः

| | |
|---|---|
| तद् + शिवः | इति स्थिते |
| तज् + शिवः | ‘स्तोः श्चुना श्चुः’ इति सूत्रेण दकारस्य चुत्वे |
| तच् + शिवः | ‘खरि च’ इति सूत्रेण जकारस्य चर्त्वे |
| तच् + छिवः | ‘शश्छोऽटि’ इति सूत्रेण छत्वे कृते |
| तच्छिवः | पदसिद्धम्। |
| तच् शिवः | (छत्वाभावे) |

# धन्यवादः